दिनांक 13-12-20   उपशास्त्री प्रथम वर्ष, विषय व्याकरण
ग्रन्थ- सिद्धान्त कौमुदी (हलन्त पुल्लिङ्ग प्रकरणम्)

1 - एभिः - इदम् शब्दात् अर्थवदधातु इति सूत्रेण प्रातिपदिक संज्ञायाम्, स्वौजसम्, एवं बहुषु बहुवचनम् इति सूत्र सहकारेण इदम् शब्दात् भिस् विभक्तौ। त्यदादीनामः इति सूत्रेण अत्वे पररूपे। इद अ भिस् इति दशायां हलि लोपः इति सूत्रेण इद् भागस्य लोपे अभिस् इति दशायां आद्यन्तवद् एकस्मिन् इति सूत्रेण व्यपदेशिवद् भावे, व्यपदेशिवद् भावत्वात् अतोभिस ऐस् इति सूत्रेण ऐस् आदेशो प्राप्त तद्बाधक नेदमदसोरकोः इति सूत्रबलात् अदन्तत्वात् बहुवचने झल्येत् इति सूत्रेण एत्वे समासस्य रुत्वे विसर्गे एभिः इति सिद्धम्।

2 अस्मै - इदम् शब्दात् अर्थवदधातु इति सूत्रेण प्रातिपदिक संज्ञायां स्वौजसम् इति सूत्रेण तथा द्व्येकयोर्द्विवचनैकवचने इति सूत्र सहकारेण इदम् शब्दात् ङे विभक्तौ। त्यदादीनामः इति सूत्रेण अत्वे पररूपे। ~~सर्वनाम~~ सर्वनामत्वात् सर्वनाम्नः स्मै इति सूत्रेण ङे स्थाने स्मै आदेशो। स्थानिवत्वात् हलि लोपः इति सूत्रेण इद् भागस्य लोपे अस्मै इति सिद्धम्।

3 अस्मात् - इदम् शब्दात् अर्थवदधातु प्रातिपदिक संज्ञायाम्, स्वौजसम् इति सूत्रेण तथा द्व्येकयोर्द्विवचनैकवचने इति सूत्र सहकारेण ङसि विभक्तौ, त्यदादीनामः इति सूत्रेण अत्वे पररूपे। ङसि ङ्योः स्मात् स्मिनौ इति सूत्रेण ङसि स्थाने स्मात् आदेशो सति स्थानिवत्वात् हलि लोपः इति सूत्रेण इद् भागस्य लोपे सति अस्मात् इति सिद्धम्।

अध्यापक
एसो० प्रो० व्याकरण
रा० ड० सं० म० वि०
सुलतान पुराणिया

दिनांक 13-12-20

शास्त्री ~~तृतीय~~ खण्ड, विषय - व्याकरण

प्रथम

ग्रन्थ प्रौढ मनोरमा

प्रश्न 1 – पूर्वत्रासिद्धम् अस्य सूत्रस्य मनोरमोक्तदिशा
व्याख्या कार्या – यद्ययं स्वतन्त्रो विधिः स्यात्, तर्हि त्रिपाद्यां
पूर्वं प्रत्यय सिद्धम् इत्येव लभ्येत, त्रैपादिकन्तु पूर्वं प्रति
3 परं नासिद्धम् स्यात्। त्रैपादिकस्य पूर्वं दृष्ट्या सिद्धत्वा-
भावे दोषः स्यात्। अत आह – अधिकारोऽयम् इति।
यद्यत्र कार्यसिद्धत्वमिष्येत तर्हि पूर्वत्रासिद्धमिति
मनोरथः इत्यादावुत्वं न स्यात्। परत्वात् रोरि इत्यस्य
प्रसङ्गात्। तथा च पूर्वत्रासिद्धे नास्ति विप्रतिषेधो
ऽभावादुत्तरस्य इति सिद्धान्तो व्याकुप्येत। अमू अमी
च न सिध्येत्। त्रिपाद्यामपि परं परशास्त्रमसिद्धम् –
एतेन त्रिपाद्यां विहितं कार्यमसिद्धमित्यादि प्राचां ग्रन्थः
परास्तः।

~~अर्थात् – उक्तरीत्या कार्य~~सिद्धत्वस्य प्रति
दीक्षित ~~रीत्या~~ प्रयोजनस्य प्रथमरीत्यासिद्ध
रित्याशयः। उक्तरीत्या कार्यसिद्धत्वस्य प्रतिपादन
संभवेन इत्यर्थः।

न च पूर्वोक्तप्रकारकद्वयेऽपि ऊर्णुनाविषति इत्यादि
सिद्धिः। णत्वविधायकशास्त्रस्य निष्फलत्वं स्यात्
द्विर्वचनेऽपि वक्तुं णकार
द्वारा नकारबुद्ध्या द्विर्वचनं जातमिति पञ्चमाङ्गे णकारः
श्रुतस्यैव द्विर्वचनं जातमिति व्याख्यास्यते इति
रूपमिति वाच्यम् स्यादित्वस्य ... सपाद
ज्ञापकेन सपादसप्ताध्यायीस्थकार्ययोग्ये विषये
त्रैपादिकशास्त्रस्य पूर्वमप्रवृत्तिकल्पने गौरवात्।
ननु लोकप्रसिद्धपाठस्यानुपादानकत्वेन तद्रूपेणाज्ञानं चेत्।
विदधते कण्ठस्थम् – निवारणे प्रयत्नः। वर्गाः समगाः इति –
वर्गाणां समगाः स्युः। लोकप्रसिद्धपाठो-
पेक्षितः। चतुर्दशसूत्र्यां मकारलकार-
योगात्। अर्धविसर्गेति साद्रूप्य-
मुच्चारणे लेखने च बोध्यम्।

अमरनाथ मिश्र
एसो० प्रो० व्याकरण
रा० उ० सं० म० वि०
[illegible]